## कक्षा - ९ पाठः 10 जटायोः शौर्यम् अभ्यासः

प्र.१ एकपदेन उत्तरं लिखत -

| | | |
|---|---|---|
| १ | आयतलोचना का अस्ति? | सीता |
| २ | सा कं ददर्श ? | गृधम् |
| ३ | खगोत्तमः कीदृशीं गिरं व्याजहार? | शुभाम् |
| ४ | जटायुः काभ्यां रावणस्य गात्रे व्रणं चकार? | तीक्ष्णनखाभ्याम् |
| ५ | अरिन्दमः खगाधिपः कति बाहून् व्यपाहरत्? | दश |

प्र.२ अधोलिखितप्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत-

१ "जटायो ! पश्य" इति का वदति ?
"जटायो ! पश्य" इति सीता वदति ।

२ जटायुः रावणं किं कथयति?
जटायुः रावणं कथयति – " हे रावण ! नीचां मतिं परदाराभिमर्शनात् निवर्तय। धीरः तत् न समाचरेत् यत् परः अस्य विगर्हयेत् " इति।

३ क्रोधवशात् रावणः किं कर्तुम् उद्यतः अभवत् ?
क्रोधवशात् रावणः वैदेहीं वामेन अङ्केन संपरिष्वज्य तलेन आशु जटायुं मारयितुम् उद्यतः अभवत् ।

४ पतगेश्वरः रावणस्य कीदृशं चापं सशरं बभञ्ज?
पतगेश्वरः रावणस्य कुक्तामणिविभूषितं चापं सशरं बभञ्ज ।

५ जटायुः केन वामबाहुं दंशति?
जटायुः तुण्डेन वामबाहुं दंशति।

प्र.3 णिनि-प्रत्ययप्रयोगं कृत्वा पदानि रचयत । (इनन्तशब्दाः) (से युक्त / वाला / having such quality)

| | | |
|---|---|---|
| | गुण + णिनि = | गुणिन् (गुणी) |
| | दान + णिनि = | दानिन् (दानी) |
| क) | कवच + णिनि = | कवचिन् (कवची) |
| ख) | शर + णिनि = | शरिन् (शरी) |
| ग) | कुशल + णिनि = | कुशलिन् (कुशली) |
| घ) | धन + णिनि = | धनिन् (धनी) |
| ङ) | दण्ड + णिनि = | दण्डिन् (दण्डी) |

प्र.3 (अ) रावणस्य जटायोः च विशेषणानि पृथक् पृथक् कृत्वा लिखत।

**युवा, सशरः, वृद्धः, हताश्वः, महाबलः, पतगसत्तमः, भग्नधन्वा, महागृधः, खगाधिपः क्रोधमूर्च्छितः, पगगेश्वरः, सरथः, कवची, शरी**

| **रावणः** | **जटायुः** |
|---|---|
| युवा | वृद्धः |
| सशरः | पतगसत्तमः |
| महाबलः | महागृधः |
| हताश्वः | खगाधिपः |
| भग्नधन्वा | पतगेश्वरः |
| क्रोधमूर्च्छितः | |
| सरथः | |
| कवची, शरी | |

प्र.5 यथायोग्यं मेलयत।

| **क** | | **ख** |
|---|---|---|
| कवची | कवचधारी | अपतत् |
| आशु | शीघ्रम् | पक्षिश्रेष्ठः |
| विरथः | रथविहीनः | पृथिव्याम् |
| पपात | अपतत् | कवचधारी |
| भुवि | पृथिव्याम् | शीघ्रम् |
| पतगसत्तमः | पक्षिश्रेष्ठः | रथविहीनः |

प्र.3 विलोमपदानां यथायोग्यं लिखत

**मन्दम् पुण्यकर्मणा, हसन्ती, अनार्य, अनतिक्रम्य, देवेन्द्रेण, प्रशंसेत्, दक्षिणेन, युवा**

| **पदानि** | **विलोमपदानि** |
|---|---|
| विलपन्ती | हसन्ती |
| आर्य | अनार्य |
| राक्षसेन्द्रेण | देवेन्द्रेण |
| पापकर्मणा | पुण्यकर्मणा |
| क्षिप्रम् | मन्दम् |
| विर्गर्हयेत् | प्रशंसेत् |
| वृद्धः | युवा |
| वामेन | दक्षिणेन |
| अतिक्रम्य | अनतिक्रम्य |

6 अ) अधोलिखितानि विशेषणपदानि प्रयुज्य संस्कृतवाक्यानि रचयत।

| | | |
|---|---|---|
| शुभाम् | - | वयं सर्वदा शुभाम् वाणीम् वदेम । |
| खगाधिपः | - | अधुना खगाधिपाः गृधा: अधिकाः न सन्ति । |
| हतसारथिः | - | हतसारथिः कर्णः अपतत् । |
| वामेन | - | अहं वामेन हस्तेन पुस्तकम् उद्घाटयामि। |
| कवची | - | बाहुबली कवची आसीत् । |

आ) उदाहरणम् अनुसृत्य समस्तपदं रचयत –

(द्विगुसमासः)

| | |
|---|---|
| त्रयाणां वटानां समाहारः | त्रिलोकी |
| पञ्चानां वटानां समाहारः | पञ्चवटी |
| सप्तानां पदानां समाहारः | सप्तपदी |
| अष्टानां भुजानां समाहारः | अष्टभुजम् |
| चतुर्णां मुखानां समाहारः | चतुर्मुखम् |

# जटायोः शौर्यम्

- ❑ अत्र पाठशीर्षके पदद्वयम् अस्ति ।

**पदपरिचयः / पदार्थाः**

- ❑ जटायोः ('जटायु' उका.पुं.,ष.वि.,एक.) = जटायु-नामकस्य पक्षिणः
- ❑ शौर्यम् ('शौर्य' अका.नपुं.,प्र.वि.,एक.) = पराक्रमः इति भावः

**भावावबोधनम्**

- ❑ किम् (अस्ति) । — शौर्यम् अस्ति ।
- ❑ कस्य शौर्यम् अस्ति ? — जटायोः (गृध्रराज-पक्षिणः) शौर्यम् अस्ति ।

सा तदा करुणा वाचो विलपन्ती सुदुःखिता ।
वनस्पतिगतं गृध्रं ददर्शायतलोचना ॥१॥

सा तदा करुणा वाचो विलपन्ती सुदुःखिता।
वनस्पतिगतं गृध्रं ददर्शायतलोचना ॥१॥

# पदच्छेदः

सा, तदा, करुणा, वाचः, विलपन्ती, सुदुःखिता,
वनस्पतिगतम्, गृध्रम्, ददर्श, आयतलोचना।

सा तदा करुणा वाचो विलपन्ती सुदुःखिता।
वनस्पतिगतं गृध्रं ददर्शायतलोचना ॥१॥

# अन्वयः

तदा सा सुदुःखिता करुणा वाचो विलपन्ती
आयतलोचना वनस्पतिगतं गृध्रं ददर्श।

सा तदा करुणा वाचो विलपन्ती सुदुःखिता।
वनस्पतिगतं गृध्रं ददर्शायतलोचना ॥१॥

## पदपरिचयः पदार्थः च -

| | | | |
|---|---|---|---|
| तदा | [अव्ययम्] | = | तस्मिन् काले |
| सा | [‘तद्’दका.सर्व.,स्त्री.,प्र.वि.,एक.] | = | अर्थात् सीता |
| सुदुःखिता | [‘सु+दुःखिता’आका.स्त्री.,प्र.वि.,एक. विशेषणम्] | = | दुःखिनी |
| करुणाः | [‘करुणा’आका.स्त्री.,द्वि.वि.,बहु. विशेषणम्] | = | करुणाजनकान् |
| वाचः | [‘वाच्’चका.स्त्री.,द्वि.वि.,बहु.] | = | शब्दान् |
| विलपन्ती | [वि+लप्+शतृ] सा अर्थात् सीतायाः विशेषणम्] | | |
| विलपन्ती | [‘विलपत्’तका.स्त्री.,प्र.वि.,एक.] | = | विलापं कुर्वती |
| आयतलोचना | [आयते इव लोचने यस्य](बहुव्रीहिः) विशेषणम्] | | |
| आयतलोचना | [‘आयतलोचना’आका.स्त्री.,प्र.वि.,एक.] | = | विशालनेत्रयुक्ता |
| वनस्पतिगतम् | [‘वनस्पतिगत’अका.पुं.,द्वि.वि.,एक. विशेषणम्] | = | वृक्षे उपविष्टवन्तम् |
| गृध्रम् | [‘गृध्र’अका.पुं.,द्वि.वि.,एक.] | = | अर्थात् जटायुम् |
| ददर्श | [‘दृश्,परस्मै.’,लिट्.प्र.पु.,एक.] | = | अपश्यत् |

सा तदा करुणा वाचो विलपन्ती सुदुःखिता।
वनस्पतिगतं गृध्रं ददर्शायतलोचना ॥१॥

## भावावबोधनम् -

........ददर्श अर्थात् अपश्यत् ।

- का ददर्श ? — सा ददर्श ।
- सा कं ददर्श ? — सा गृध्रं ददर्श ।
- सा कीदृशं गृध्रं ददर्श ? — सा वनस्पतिगतं गृध्रं ददर्श ।
- कीदृशी सा वनस्पतिगतं गृध्रं ददर्श ? — आयतलोचना सा वनस्पतिगतं गृध्रं ददर्श ।
- किं कुर्वती आयतलोचना सा वनस्पतिगतं गृध्रं ददर्श ?
  विलपन्ती आयतलोचना सा वनस्पतिगतं गृध्रं ददर्श ।

सा तदा करुणा वाचो विलपन्ती सुदुःखिता।
वनस्पतिगतं गृध्रं ददर्शायतलोचना ॥१॥

- कः विलपन्ती आयतलोचना सा वनस्पतिगतं गृध्रं ददर्श ?
  वाचः विलपन्ती आयतलोचना सा वनस्पतिगतं गृध्रं ददर्श।

- कीदृश्यः वाचः विलपन्ती आयतलोचना सा वनस्पतिगतं गृध्रं ददर्श ?
  करुणाः वाचः विलपन्ती आयतलोचना सा वनस्पतिगतं गृध्रं ददर्श।

- कीदृशी सा करुणाः वाचः विलपन्ती आयतलोचना वनस्पतिगतं गृध्रं ददर्श ?
  सुदुःखिता सा करुणाः वाचः विलपन्ती आयतलोचना वनस्पतिगतं गृध्रं ददर्श।

- कदा सा करुणाः वाचः विलपन्ती आयतलोचना वनस्पतिगतं गृध्रं ददर्श ?
  तदा सा करुणाः वाचः विलपन्ती आयतलोचना वनस्पतिगतं गृध्रं ददर्श।

सा तदा करुणा वाचो विलपन्ती सुदुःखिता।
वनस्पतिगतं गृध्रं ददर्शायतलोचना ॥१॥

# भावः

तस्मिन् काले अत्यन्तं दुःखिनी, करुणाजनकैः वचनैः विलापं कुर्वती, विशालनेत्रवती (सा सीता) वृक्षे उपविष्टवन्तं गृध्रम् (जटायुम्) अपश्यत्।

जटायो पश्य मामार्य ह्रियमाणामनाथवत् ।
अनेन राक्षसेन्द्रेण करुणं पापकर्मणा ॥२॥

जटायो पश्य मामार्य ह्रियमाणामनाथवत् ।
अनेन राक्षसेन्द्रेण करुणं पापकर्मणा ।।२।।

# पदच्छेदः

जटायो!, पश्य, माम्, आर्य !, ह्रियमाणाम्,
अनाथवत्, अनेन, राक्षसेन्द्रेण, करुणं पापकर्मणा ।

जटायो पश्य मामार्य ह्रियमाणामनाथवत् ।
अनेन राक्षसेन्द्रेण करुणं पापकर्मणा ।।२।।

# अन्वयः

आर्य जटायो ! अनेन पापकर्मणा राक्षसेन्द्रेण करुणम् अनाथवत् ह्रियमाणां मां पश्य ।

जटायो पश्य मामार्य ह्रियमाणामनाथवत् ।
अनेन राक्षसेन्द्रेण करुणं पापकर्मणा ॥२॥

**पदपरिचयः पदार्थः च -**

| | | | |
|---|---|---|---|
| आर्य | [‘आर्य’अका.पुं.,सम्बो.,एक. जटायोः विशेषणम्] | = | हे श्रेष्ठ ! |
| जटायो ! | [‘जटायु’उका.,पुं.,सम्बो.,एक.] | = | पक्षिराज ! |
| अनेन | [इदम्’मका.,पुं.,तृ.वि.,एक.] | = | एतेन |
| पापकर्मणा | [‘पापकर्म’अका.पुं.,तृ.वि.,एक. विशेषणम्] | = | पापकार्येण |
| राक्षसेन्द्रेण | [राक्षसानाम् इन्द्रः इति राक्षसेन्द्रः तेन राक्षसेन्द्रेण] | | |
| राक्षसेन्द्रेण | [‘राक्षसेन्द्र’अका.पुं.,तृ.वि.,एक.] | = | राक्षसानां राज्ञा |
| करुणम् | [‘करुण’अका.नपुं.,प्र.वि.,एक.] | = | अर्थात् अकरुणभावेन |
| अनाथवत् | [अव्ययम्] | = | अनाथः इव |
| ह्रियमाणाम् | [‘ह्रियमाणा’आका.स्त्री.,द्वि.वि.,एक. सीतायाः विशेषणम्] | = | बलपूर्वकं नीयमानाम् |
| माम् | [‘अस्मद्’दका.सर्व.,स्त्री.,द्वि.वि.,एक.] | = | अर्थात् सीताम् |
| पश्य | [‘दृश्,परस्मै.’,लोट्.,म.पु.,एक.] | = | अवलोकय |

जटायो पश्य मामार्य ह्रियमाणामनाथवत् ।
अनेन राक्षसेन्द्रेण करुणं पापकर्मणा ॥२॥



**भावावबोधनम् -**

........पश्य अर्थात् अवलोकनं कुरु ।

- कां पश्य ? — मां (सीताम्) पश्य ।
- कीदृशीं मां पश्य ? — ह्रियमाणां मां पश्य ।
- कथं ह्रियमाणां मां पश्य ? — अनाथवत् ह्रियमाणां मां पश्य ।
- कथम् अनाथवत् ह्रियमाणां मां पश्य ? — करुणम् अनाथवत् ह्रियमाणां मां पश्य ।
- केन (रावणेन) करुणम् अनाथवत् ह्रियमाणां मां पश्य ?
  राक्षसेन्द्रेण करुणम् अनाथवत् ह्रियमाणां मां पश्य ।

जटायो पश्य मामार्य ह्रियमाणामनाथवत् ।
अनेन राक्षसेन्द्रेण करुणं पापकर्मणा ।।२।।

- **कीदृशेन** राक्षसेन्द्रेण करुणम् अनाथवत् ह्रियमाणां मां पश्य ?
  **पापकर्मणा** राक्षसेन्द्रेण करुणम् अनाथवत् ह्रियमाणां मां पश्य ।
- **केन** पापकर्मणा राक्षसेन्द्रेण करुणम् अनाथवत् ह्रियमाणां मां पश्य ?
  **अनेन** पापकर्मणा राक्षसेन्द्रेण करुणम् अनाथवत् ह्रियमाणां मां पश्य ।
- 'आर्य जटायो ! अनेन पापकर्मणा राक्षसेन्द्रेण करुणम् अनाथवत् ह्रियमाणां मां पश्य' इति **का** **कं** प्रति वदति ?
  'आर्य जटायो ! अनेन पापकर्मणा राक्षसेन्द्रेण करुणम् अनाथवत् ह्रियमाणां मां पश्य' इति **सीता** **जटायुं** प्रति वदति ।

जटायो पश्य मामार्य ह्रियमाणामनाथवत् ।
अनेन राक्षसेन्द्रेण करुणं पापकर्मणा ॥२॥

# भावः

हे आर्य जटायो ! अनेन पापकर्मकर्त्रा राक्षसानां राज्ञा करुणारहितः (निर्दयी) जनः यथा भवति तथा अनाथवत् ह्रियमाणां मां (सीताम्) पश्य ।

तं शब्दमवसुप्तस्तु जटायुरथ शुश्रुवे ।
निरीक्ष्य रावणं क्षिप्रं वैदेहीं च ददर्श सः ॥३॥

तं शब्दमवसुप्तस्तु जटायुरथ शुश्रुवे।
निरीक्ष्य रावणं क्षिप्रं वैदेहीं च ददर्श सः ।।३।।

# पदच्छेदः

तम्, शब्दम्, अवसुप्तः, तु, जटायुः, अथ, शुश्रुवे,
निरीक्ष्य, रावणम्, क्षिप्रम्, वैदेहीम्, च, ददर्श, सः ।

तं शब्दमवसुप्तस्तु जटायुरथ शुश्रुवे ।
निरीक्ष्य रावणं क्षिप्रं वैदेहीं च ददर्श सः ।।३।।

# अन्वयः

अथ अवसुप्तः जटायुः तु तं शब्दं शुश्रुवे ।
क्षिप्रं निरीक्ष्य रावणं सः वैदेहीं च ददर्श ।

तं शब्दमवसुप्तस्तु जटायुरथ शुश्रुवे ।
निरीक्ष्य रावणं क्षिप्रं वैदेहीं च ददर्श सः ।।३।।

**पदपरिचयः पदार्थः च -**

| | | | |
|---|---|---|---|
| अथ | [अव्ययम्] | = | आरम्भसूचकम् |
| अवसुप्तः | [‘अव+स्वप्+क्त’अका.पुं.,प्र.वि.,एक.] | = | शयितः |
| जटायुः | [‘जटायु’उका.पुं.,प्र.वि.,एक.] | = | पक्षिराजः / गृध्रराजः |
| तु | [अव्ययम्] | = | वाक्यपोषकम् / तो |
| तम् | [‘तद्’दका.सर्व.,पुं.,द्वि.वि.,एक.] | = | अर्थात् सीतायाः ध्वनिम् |
| शब्दम् | [‘शब्द’अका.पुं.,द्वि.वि.,एक.] | = | ध्वनिम् |
| शुश्रुवे | [‘श्रु,आत्मने.’लिट्.प्र.पु.,एक. आर्षप्रयोगः] | = | अशृणोत् |
| क्षिप्रम् | [अव्ययम्] | = | शीघ्रम् |
| रावणम् | [‘रावण’अका.पुं.,द्वि.वि.,एक.] | = | लङ्कापतिं रावणम् |
| निरीक्ष्य | [‘निर्+ईक्ष्,आत्मने.’,ल्यप्] | = | अवलोक्य |
| सः | [‘तद्’दका.सर्व.,पुं.,प्र.वि.,एक.] | = | अर्थात् जटायुः |
| वैदेहीम् | [‘वैदेही’ईका.स्त्री.,द्वि.वि.,एक.] | = | सीताम् |
| च | [अव्ययम्] | = | अपि च |
| ददर्श | [‘दृश्,परस्मै.’,लिट्.प्र.पु.,एक.] | = | अपश्यत् |

तं शब्दमवसुप्तस्तु जटायुरथ शुश्रुवे ।
निरीक्ष्य रावणं क्षिप्रं वैदेहीं च ददर्श सः ।।३।।

## भावावबोधनम् -

अथ......शुश्रुवे अर्थात् अथ श्रुतवान् ।

- अथ कः शुश्रुवे ? — अथ जटायुः शुश्रुवे ।
- अथ कीदृशः जटायुः शुश्रुवे ? — अथ अवसुप्तः जटायुः शुश्रुवे ।
- अथ अवसुप्तः जटायुः कं शुश्रुवे ? — अथ अवसुप्तः जटायुः तु शब्दं शुश्रुवे ।
- अथ अवसुप्तः जटायुः तु कं शब्दं शुश्रुवे ? — अथ अवसुप्तः जटायुः तु तं शब्दं शुश्रुवे ।

तं शब्दमवसुप्तस्तु जटायुरथ शुश्रुवे।
निरीक्ष्य रावणं क्षिप्रं वैदेहीं च ददर्श सः ॥३॥

..............ददर्श अर्थात् अपश्यत्?

- ❑ कः ददर्श ? — सः ददर्श।
- ❑ सः कं ददर्श ? — सः रावणं ददर्श।
- ❑ सः रावणं पुनः कां ददर्श ? — सः रावणं पुनः वैदेहीं च ददर्श।
- ❑ सः किं कृत्वा रावणं वैदेहीं च ददर्श ? — सः निरीक्ष्य रावणं वैदेहीं च ददर्श।
- ❑ सः कथं निरीक्ष्य रावणं वैदेहीं च ददर्श ? — सः क्षिप्रं निरीक्ष्य रावणं वैदेहीं च ददर्श।

तं शब्दमवसुप्तस्तु जटायुरथ शुश्रुवे ।
निरीक्ष्य रावणं क्षिप्रं वैदेहीं च ददर्श सः ॥३॥

# भावः

सुप्तः जटायुः सीतायाः ध्वनिं श्रुतवान् । ध्वनिं श्रुत्वा सः अत्र, तत्र निरीक्षणं कृतवान् । तदा सः सर्वप्रथमं रावणं दृष्टवान् । तदनन्तरं सीताम् दृष्टवान् ।

ततः पर्वतशृङ्गाभस्तीक्ष्णतुण्डः खगोत्तमः ।
वनस्पतिगतः श्रीमान्व्याजहार शुभां गिरम् ।।४।।

ततः पर्वतशृङ्गाभस्तीक्ष्णतुण्डः खगोत्तमः ।
वनस्पतिगतः श्रीमान्व्याजहार शुभां गिरम् ।।४।।

# पदच्छेदः

ततः, पर्वतशृङ्गाभः, तीक्ष्णतुण्डः, खगोत्तमः ।
वनस्पतिगतः, श्रीमान्, व्याजहार, शुभाम्, गिरम् ।

ततः पर्वतशृङ्गाभस्तीक्ष्णतुण्डः खगोत्तमः ।
वनस्पतिगतः श्रीमान्व्याजहार शुभां गिरम् ।।४।।

# अन्वयः

ततः पर्वतशृङ्गाभः वनस्पतिगतः तीक्ष्णतुण्डः
खगोत्तमः श्रीमान् शुभां गिरं व्याजहार ।

ततः पर्वतशृङ्गाभस्तीक्ष्णतुण्डः खगोत्तमः ।
वनस्पतिगतः श्रीमान्व्याजहार शुभां गिरम् ।।४।।

## पदपरिचयः पदार्थः च -

| | | | |
|---|---|---|---|
| ततः | [‘तत्+तसिल्’ अव्ययम्] | = | तदनन्तरम् |
| पर्वतशृङ्गाभः | [पर्वतस्य शृङ्गः इति पर्वतशृङ्गः, पर्वतशृङ्गः इव आभा यस्य सः पर्वतशृङ्गाभः] | | |
| पर्वतशृङ्गाभः | [‘पर्वतशृङ्गाभ’अका.पुं.,प्र.वि.,एक.] | = | पर्वतशिखरसदृशे उन्नते |
| तीक्ष्णतुण्डः | [तीक्ष्णः तुण्डः यस्य सः, तीक्ष्णतुण्डः बहुव्रीहिः] | | |
| तीक्ष्णतुण्डः | [‘तीक्ष्णतुण्ड’अका.पुं.,प्र.वि.,एक. विशेषणम्] | = | तीक्ष्णचञ्चुकः |
| खगोत्तमः | [खगेषु उत्तमः इति खगोत्तमः] | | |
| खगोत्तमः | [‘खगोत्तम’अका.पुं.,प्र.वि.,एक. विशेषणम्] | = | पक्षिषु श्रेष्ठः अर्थात् पक्षिराजः |
| वनस्पतिगतः | [‘वनस्पतिगत’अका.पुं.,प्र.वि.,एक. विशेषणम्] | = | वृक्षे उपविष्टः |
| श्रीमान् | [‘श्रीमत्’तका.पुं.,प्र.वि.,एक.] | = | अर्थात् जटायुः |
| शुभाम् | [‘शुभा’आका.स्त्री.,द्वि.वि.,एक. विशेषणम्] | = | शुभयुक्ताम् |
| गिरम् | [‘गिर्’रेफान्त-स्त्री.,द्वि.वि.,एक.] | = | वाणीम् |
| व्याजहार | [‘वि+आङ्+हृञ्,परस्मै.’लिट्.प्र.पु.,एक.] | = | अकथयत् / अवदत् |

ततः पर्वतशृङ्गाभस्तीक्ष्णतुण्डः खगोत्तमः ।
वनस्पतिगतः श्रीमान्व्याजहार शुभां गिरम् ।।४।।

## भावावबोधनम् -

......व्याजहार अर्थात् अकथयत् ।

- कः व्याजहार ? — खगोत्तमः (जटायुः) व्याजहार ।
- कीदृशः खगोत्तमः व्याजहार ? — श्रीमान् खगोत्तमः व्याजहार ।
- श्रीमान् खगोत्तमः कां व्याजहार ? — श्रीमान् खगोत्तमः गिरं व्याजहार ।
- श्रीमान् खगोत्तमः कीदृशीं गिरं व्याजहार ? — श्रीमान् खगोत्तमः शुभां गिरं व्याजहार ।
- कीदृशः श्रीमान् खगोत्तमः शुभां गिरं व्याजहार ? — वनस्पतिगतः श्रीमान् खगोत्तमः शुभां गिरं व्याजहार ।

ततः पर्वतशृङ्गाभस्तीक्ष्णतुण्डः खगोत्तमः ।
वनस्पतिगतः श्रीमान्व्याजहार शुभां गिरम् ।।४।।

- कीदृशः खगोत्तमः वनस्पतिगतः श्रीमान् शुभां गिरं व्याजहार ?
  तीक्ष्णतुण्डः खगोत्तमः वनस्पतिगतः श्रीमान् शुभां गिरं व्याजहार ।

- कीदृशः तीक्ष्णतुण्डः खगोत्तमः वनस्पतिगतः श्रीमान् शुभां गिरं व्याजहार ?
  पर्वतशृङ्गाभः तीक्ष्णतुण्डः खगोत्तमः वनस्पतिगतः श्रीमान् शुभां गिरं व्याजहार ।

- कुतः पर्वतशृङ्गाभः तीक्ष्णतुण्डः खगोत्तमः वनस्पतिगतः श्रीमान् शुभां गिरं व्याजहार ?
  ततः (रावणेन अपह्रियमाणायाः सीतायाः ध्वनिं श्रुत्वा) पर्वतशृङ्गाभः तीक्ष्णतुण्डः खगोत्तमः वनस्पतिगतः श्रीमान् शुभां गिरं व्याजहार ।

ततः पर्वतशृङ्गाभस्तीक्ष्णतुण्डः खगोत्तमः ।
वनस्पतिगतः श्रीमान्व्याजहार शुभां गिरम् ।।४।।

# भावः

पुनः पर्वतशिखरसदृशे उन्नते वृक्षे उपविष्टः तीक्ष्णचञ्चुयुक्तः, पक्षिराजः, श्रीमान् जटायुः रावणं प्रति शुभवचनानि अवदत् ।

निवर्तय मतिं नीचां परदाराभिमर्शनात् ।
न तत्समाचरेद्धीरो यत्परोऽस्य विगर्हयेत् ॥५॥

निवर्तय मतिं नीचां परदाराभिमर्शनात् ।
न तत्समाचरेद्धीरो यत्परोऽस्य विगर्हयेत् ॥५॥

# पदच्छेदः

निवर्तय, मतिम्, नीचाम्, परदाराभिमर्शनात्, न, तत्,
समाचरेत्, धीरः, यत्, परः, अस्य, विगर्हयेत् ।

निवर्तय मतिं नीचां परदाराभिमर्शनात् ।
न तत्समाचरेद्धीरो यत्परोऽस्य विगर्हयेत् ।।५।।

# अन्वयः

परदाराभिमर्शनात् नीचां मतिं निवर्तय ।
धीरः तत् न समाचरेत् यत् अस्य परः विगर्हयेत् ।

निवर्तय मतिं नीचां परदाराभिमर्शनात् ।
न तत्समाचरेद्धीरो यत्परोऽस्य विगर्हयेत् ।।५।।

**पदपरिचयः पदार्थः च -**

- परदाराभिमर्शनात् [परेषां दाराः इति परदाराः, परदाराणाम् अभिमर्शनम् इति परदारभिमर्शनम्,तस्मात् ]
- परदाराभिमर्शनात् ['परदाराभिमर्शन'अका.नपुं.,प.वि.,एक.] = परस्त्रीस्पर्शात्
- नीचाम् ['नीचा'आका.स्त्री.,द्वि.वि.,एक. विशेषणम्] = अधमाम्
- मतिम् ['मति'इका.स्त्री.,द्वि.वि.,एक.] = बुद्धिम्
- निवर्तय ['नि+वृत्,आत्मने.',लोट्.,म.पु.,एक.] = वारय / अवरोधय
- धीरः ['धीर'अका.,पुं.,प्र.वि.,एक.] = धैर्यवान्
- तत् ['तद्'दका.सर्व,नपुं.,द्वि.वि.,एक.] = अर्थात् कर्म
- न [अव्ययम्] = न / मा
- समाचरेत् ['सम्+आ+चर्,परस्मै.,'विधिलिङ्.,प्र.पु.,एक.] = न कुर्यात्
- यत् ['यद्'दका.,नपुं.,द्वि.वि.,एक.] = अर्थात् कर्म
- अस्य ['इदम्'मका.,सर्व.,नपुं.,ष.वि.,एक.] = अर्थात् कार्यस्य
- परः ['पर'अका.,पुं.,प्र.वि.,एक.] = अन्यः
- विगर्हयेत् ['वि+गर्ह्,परस्मै.,विधिलिङ्.,प्र.पु.,एक.'] = निन्द्यात्

निवर्तय मतिं नीचां परदाराभिमर्शनात् ।
न तत्समाचरेद्धीरो यत्परोऽस्य विगर्हयेत् ॥५॥

## भावावबोधनम् -

......निवर्तय अर्थात् वारय / अवरोधय ।

- कां निवर्तय ? — मतिं निवर्तय ।
- कीदृशीं मतिं निवर्तय ? — नीचां मतिं निवर्तय ।
- कस्मात् नीचां मतिं निवर्तय ? — परदाराभिमर्शनात् नीचां मतिं निवर्तय ।

निवर्तय मतिं नीचां परदाराभिमर्शनात् ।
न तत्समाचरेद्धीरो यत्परोऽस्य विगर्हयेत् ।।५।।

.......न समाचरेत् अर्थात् न आचरणं कुर्यात् ।

- किं न समाचरेत् ?
- कः तत् न समाचरेत् ?
- धीरः तत् किं न समाचरेत् ?

तत् न समाचरेत् ।

धीरः तत् न समाचरेत् ।

धीरः तत् न समाचरेत् यत् अस्य परः विगर्हयेत् ।

निवर्तय मतिं नीचां परदाराभिमर्शनात् ।
न तत्समाचरेद्धीरो यत्परोऽस्य विगर्हयेत् ॥५॥

# भाव:

अन्येषां स्त्रीणां स्पर्शेन मनुष्यः अधमां गतिं प्राप्नोति ।
अतः अन्ये जनाः यत् कार्यं निन्दन्ति, तस्मात् अनुचितकार्यात्
(हे मनुष्य !) सर्वदा स्वस्य रक्षणं करणीयम् ।

वृद्धोऽहं त्वं युवा धन्वी सरथः कवची शरी।
न चाप्यादाय कुशली वैदेहीं मे गमिष्यसि ॥६॥

वृद्धोऽहं त्वं युवा धन्वी सरथः कवची शरी ।
न चाप्यादाय कुशली वैदेहीं मे गमिष्यसि ।।६।।

# पदच्छेदः

वृद्धः, अहम्, त्वम्, युवा, धन्वी, सरथः, कवची, शरी, न,

च, अपि, आदाय, कुशली, वैदेहीम्, मे, गमिष्यसि ।

वृद्धोऽहं त्वं युवा धन्वी सरथः कवची शरी ।
न चाप्यादाय कुशली वैदेहीं मे गमिष्यसि ।।६।।

# अन्वयः

अहं वृद्धः त्वं युवा धन्वी, सरथः कवची, शरी च

अपि मे वैदेहीम् आदाय कुशली न गमिष्यसि ।

वृद्धोऽहं त्वं युवा धन्वी सरथः कवची शरी ।
न चाप्यादाय कुशली वैदेहीं मे गमिष्यसि ।।६।।

## पदपरिचयः पदार्थः च -

| | | | |
|---|---|---|---|
| ▪ अहम् | [अस्मद्’दका.,सर्व.,पुं.,प्र.वि.,एक.] | = | जटायुः / गृध्रराजः |
| ▪ वृद्धः | [‘वृद्ध’अका.,पुं.,प्र.वि.,एक.) विशेषणम्] | = | वयसा ज्येष्ठः |
| ▪ त्वम् | [‘युष्मद्’दका.,सर्व.,पुं.,प्र.वि.,एक.] | = | रावणः |
| ▪ युवा | [‘युवन्’नका.पुं.,प्र.वि.,एक. विशेषणम्] | = | युवकः |
| ▪ धन्वी | [‘धन्विन्’नका.,पुं.,प्र.वि.,एक. विशेषणम्] | = | धनुर्धरः |
| ▪ सरथः | [‘सरथ’अका.पुं.,प्र.वि.,एक. विशेषणम्] | = | रथयुक्तः |
| ▪ कवची | [‘कवचिन्’नका.पुं.,प्र.वि.,एक. विशेषणम्] | = | कवचधारी |
| ▪ शरी | [‘शरिन्’नका.,पुं.,प्र.वि.,एक. विशेषणम्] | = | बाणयुक्तः |

वृद्धोऽहं त्वं युवा धन्वी सरथः कवची शरी।
न चाप्यादाय कुशली वैदेहीं मे गमिष्यसि ॥६॥

## पदपरिचयः पदार्थः च -

| | | | |
|---|---|---|---|
| ▪ च | [अव्ययपदम्] | = | च / तथा च |
| ▪ अपि | [अव्ययम्] | = | भी इति |
| ▪ मे | ['अस्मद्'दका.,पुं.,ष.वि.,एक.] | = | 'मम' इति स्थाने 'मे' इति |
| ▪ वैदेहीम् | ['वैदेही'ईका.,स्त्री.,द्वि.वि.,एक.] | = | सीताम् |
| ▪ आदाय | ['आङ्+दा+ल्यप्'] | = | आनीय |
| ▪ कुशली | ['कुशलिन्'नका.पुं.,प्र.वि.,एक. विशेषणम्] | = | कुशलतापूर्वकम् |
| ▪ न | [अव्ययम्] | = | 'न' इति भावः |
| ▪ गमिष्यसि | ['गम्,परस्मै.' लृट्.म.पु.,एक.] | = | गमनं करिष्यसि |

वृद्धोऽहं त्वं युवा धन्वी सरथः कवची शरी ।
न चाप्यादाय कुशली वैदेहीं मे गमिष्यसि ॥६॥

## भावावबोधनम् -

......न गमिष्यसि अर्थात् गमनं न करिष्यसि ।

- ‘गमिष्यसि’ इति क्रियापदस्य कर्तृपदं किम् ? — ‘गमिष्यसि’ इति क्रियापदस्य कर्तृपदं ‘त्वम्’ इति अस्ति ।
- ‘त्वम्’ इति सर्वनामपदं कस्य कृते प्रयुक्तम् अस्ति ? — ‘त्वम्’ इति सर्वनामपदं रावणस्य कृते प्रयुक्तम् अस्ति ।
- रावणः किं न करिष्यति ? — रावणः न गमिष्यति ।
- रावणः कथं न गमिष्यति ? — रावणः कुशली न गमिष्यति ।
- रावणः किं कृत्वा कुशली न गमिष्यति ? — रावणः मे वैदेहीम् आदाय कुशली न गमिष्यति ।
- कीदृशः रावणः वैदेहीम् आदाय कुशली न गमिष्यति ? — युवा,धन्वी, सरथः, कवची, शरी च अपि रावणः मे वैदेहीम् आदाय कुशली न गमिष्यति ।

वृद्धोऽहं त्वं युवा धन्वी सरथः कवची शरी ।
न चाप्यादाय कुशली वैदेहीं मे गमिष्यसि ।।६।।

...........(अस्मि) ।

- ‘अस्मि’ इति क्रियापदस्य कर्तृपदं किम् अस्ति ?
  ‘अस्मि’ इति क्रियापदस्य कर्तृपदम् ‘अहम्’ इति अस्ति ।
- ‘अहम्’ इति सर्वनामपदं कस्य कृते प्रयुक्तम् अस्ति ?
  ‘अहम्’ इति सर्वनामपदं जटायोः कृते प्रयुक्तम् अस्ति ।
- जटायुः कीदृशः अस्ति ?
  जटायुः वृद्धः अस्ति ।
- अत्र श्लोके ‘मे’ इति पदं कस्य कृते प्रयुक्तम् अस्ति ?
  अत्र श्लोके ‘मे’ इति पदं जटायोः कृते प्रयुक्तम् अस्ति ।

वृद्धोऽहं त्वं युवा धन्वी सरथः कवची शरी।
न चाप्यादाय कुशली वैदेहीं मे गमिष्यसि ॥६॥

# भावः

वृक्षे उपविष्टः जटायुः रावणं प्रति वदति यत् - हे रावण !
यद्यपि अहं (जटायुः) वृद्धः अस्मि, त्वम् (रावणः) युवा असि,
भवतः पार्श्वे धनुः, रथः, कवचः, बाणः च अस्ति, तथापि त्वं
(हे रावण!) मम सीतां नीत्वा कुशलतापूर्वकं गन्तुं न शक्ष्यसि।

तस्य तीक्ष्णनखाभ्यां तु चरणाभ्यां महाबलः ।
चकार बहुधा गात्रे व्रणान्पतगसत्तमः ॥७॥

तस्य तीक्ष्णनखाभ्यां तु चरणाभ्यां महाबलः ।
चकार बहुधा गात्रे व्रणान्पतगसत्तमः ॥७॥

# पदच्छेदः

तस्य, तीक्ष्णनखाभ्याम्, तु, चरणाभ्याम्, महाबलः,
चकार, बहुधा, गात्रे, व्रणान्पतगसत्तमः ।

तस्य तीक्ष्णनखाभ्यां तु चरणाभ्यां महाबलः ।
चकार बहुधा गात्रे व्रणान्पतगसत्तमः ॥७॥

# अन्वयः

महाबलः पतगसत्तमः तु तीक्ष्णनखाभ्यां
चरणाभ्यां तस्य गात्रे बहुधा व्रणान् चकार ।

तस्य तीक्ष्णनखाभ्यां तु चरणाभ्यां महाबलः ।
चकार बहुधा गात्रे व्रणान्पतगसत्तमः ॥७॥

## पदपरिचयः पदार्थः च -

| | | | |
|---|---|---|---|
| महाबलः | ['महाबल'अका.पुं.,प्र.वि.,एक. विशेषणम्] | = | महाबलशाली |
| पतगसत्तमः | ['पतगसत्तम'अका.,पुं.,प्र.वि.,एक. विशेषणम्] | = | पक्षिशिरोमणिः |
| तु | [अव्ययम्] | = | तो |
| तीक्ष्णनखाभ्याम् | ['तीक्ष्णनख'अका.पुं.,तृ.वि.,द्विव.] | = | तीक्ष्णनखद्वारा |
| चरणाभ्याम् | ['चरण'अका.पुं.,तृ.वि.,द्वि.व.] | = | चरणयोः माध्यमेन |
| तस्य | ['तद्'दका.,सर्व.,पुं.,ष.वि.,एक.] | = | रावणस्य |
| गात्रे | ['गात्र'अका.,नपुं.,स.वि.,एक.] | = | शरीरे |
| बहुधा | [अव्ययम्] | = | अनेकवारम् |
| व्रणान् | ['व्रण'अका.पुं.,द्वि.वि.,बहु.] | = | प्रहारजनितस्फोटान् |
| चकार | ['कृ,परस्मै.',लिट्.,प्र.पु.,एक.] | = | अकरोत् |

तस्य तीक्ष्णनखाभ्यां तु चरणाभ्यां महाबलः ।
चकार बहुधा गात्रे व्रणान्पतगसत्तमः ॥७॥

## भावावबोधनम् -

................चकार अर्थात् अकरोत् ।

- कः चकार ? — पतगसत्तमः (जटायुः) चकार ।
- कीदृशः पतगसत्तमः चकार ? — महाबलः पतगसत्तमः चकार ।
- महाबलः पतगसत्तमः कान् चकार ? — महाबलः पतगसत्तमः व्रणान् चकार ।
- महाबलः पतगसत्तमः कतिवारं व्रणान् चकार ? — महाबलः पतगसत्तमः बहुधा व्रणान् चकार ।
- महाबलः पतगसत्तमः काभ्यां बहुधा व्रणान् चकार ? — महाबलः पतगसत्तमः तु चरणाभ्यां बहुधा व्रणान् चकार ।
- महाबलः पतगसत्तमः तु चरणाभ्यां पुनः च काभ्यां बहुधा व्रणान् चकार ?
  महाबलः पतगसत्तमः तु चरणाभ्यां तीक्ष्णनखाभ्यां च बहुधा व्रणान् चकार ।
- महाबलः पतगसत्तमः तु चरणाभ्यां तीक्ष्णनखाभ्यां च कुत्र बहुधा व्रणान् चकार ?
  महाबलः पतगसत्तमः तु चरणाभ्यां तीक्ष्णनखाभ्यां च गात्रे व्रणान् चकार ।
- महाबलः पतगसत्तमः तु चरणाभ्यां तीक्ष्णनखाभ्यां च कस्य गात्रे बहुधा व्रणान् चकार ?
  महाबलः पतगसत्तमः तु चरणाभ्यां तीक्ष्णनखाभ्यां च तस्य (रावणस्य) गात्रे व्रणान् चकार ।



तस्य तीक्ष्णनखाभ्यां तु चरणाभ्यां महाबलः ।
चकार बहुधा गात्रे व्रणान्पतगसत्तमः ।।७।।

# भावः

महाबलशाली पक्षिषु श्रेष्ठः जटायुः तीक्ष्णनखाभ्यां चरणाभ्यां च रावणस्य शरीरे बहून् व्रणान् अकरोत् ।

ततोऽस्य सशरं चापं मुक्तामणिविभूषितम् ।
चरणाभ्यां महातेजा बभञ्जास्य महद्धनुः ॥८॥

ततोऽस्य सशरं चापं मुक्तामणिविभूषितम्।
चरणाभ्यां महातेजा बभञ्जास्य महद्धनुः ॥८॥

# पदच्छेदः

ततः, अस्य, सशरम्, चापम्, मुक्तामणिविभूषितम्।
चरणाभ्याम्, महातेजाः, बभञ्ज, अस्य, महत्, धनुः।

ततोऽस्य सशरं चापं मुक्तामणिविभूषितम्।
चरणाभ्यां महातेजा बभञ्जास्य महद्धनुः ॥८॥

# अन्वयः

ततः महातेजाः अस्य मुक्तामणिविभूषितं सशरं चापम् अस्य महद् धनुः चरणाभ्यां बभञ्ज ।

ततोऽस्य सशरं चापं मुक्तामणिविभूषितम्।
चरणाभ्यां महातेजा बभञ्जास्य महद्धनुः ॥८॥

**पदपरिचयः पदार्थः च -**

| | | | |
|---|---|---|---|
| ततः | [‘तद्+तसिल्’] | = | तदनन्तरम् |
| महातेजाः | [‘महातेजस्’सका.पुं.,प्र.वि.,एक. विशेषणम्] | = | महातेजस्वी |
| अस्य | [‘इदम्’मका.सर्व.,पुं.,ष.वि.,एक.] | = | अर्थात् रावणस्य |
| मुक्तामणिविभूषितम् | [मुक्ताश्च मणयश्च मुक्तामणयः, मुक्तामणिभिः विभूषितः, मुक्तामणिविभूषितः,तम्] | | |
| मुक्तामणिविभूषितम् | [‘मुक्तामणिविभूषित’अका.नपुं.,द्वि.वि.,एक.] | = | मुक्तामणिभिः विभूषितम् |
| सशरम् | [‘सशर’अका.,नपुं.,द्वि.वि.,एक.] | = | बाणसहितम् |
| चापम् | [‘चाप’अका.,नपुं.,द्वि.वि.,एक.] | = | चापम् |
| अस्य | [‘इदम्’मका.पुं.,ष.वि.,एक.] | = | रावणस्य |
| महद् | [‘महत्’तका.,नपुं.,द्वि.वि.,एक. विशेषणम् ] | = | विशालम् |
| धनुः | [‘धनुस्’सका.,नपुं.,द्वि.वि.,एक.] | = | धनुः |
| चरणाभ्याम् | [‘चरण’अका.पुं.,तृ.वि.,द्विव.] | = | पादाभ्याम् |
| बभञ्ज | [‘भञ्ज्,परस्मै.’, लिट्.प्र.पु.,एक.] | = | भग्नं कृतवान् |

ततोऽस्य सशरं चापं मुक्तामणिविभूषितम्।
चरणाभ्यां महातेजा बभञ्जास्य महद्धनुः ॥८॥

## भावावबोधनम् -

....................बभञ्ज अर्थात् भग्नं कृतवान् ।

- कः बभञ्ज ? — महातेजाः बभञ्ज ।
- महातेजाः काभ्यां बभञ्ज ? — महातेजाः चरणाभ्यां बभञ्ज ।
- महातेजाः किं चरणाभ्यां बभञ्ज ?
  महातेजाः धनुः चरणाभ्यां बभञ्ज ।
- महातेजाः कीदृशं धनुः चरणाभ्यां बभञ्ज ?
  महातेजाः महत् धनुः चरणाभ्यां बभञ्ज ।
- महातेजाः महत् धनुः पुनः किं चरणाभ्यां बभञ्ज ?
  महातेजाः महत् धनुः सशरं चापं च चरणाभ्यां बभञ्ज ।



ततोऽस्य सशरं चापं मुक्तामणिविभूषितम्।
चरणाभ्यां महातेजा बभञ्जास्य महद्धनुः ॥८॥

- महातेजाः **कीदृशं** सशरं चापम् अस्य (रावणस्य) महत् धनुः च चरणाभ्यां बभञ्ज ?
  महातेजाः **मुक्तामणिविभूषितं** सशरं चापम् अस्य महत् धनुः च चरणाभ्यां बभञ्ज ।

- महातेजाः **कस्य** मुक्तामणिविभूषितं सशरं चापम् अस्य महत् धनुः च चरणाभ्यां बभञ्ज ?
  महातेजाः **अस्य (रावणस्य)** मुक्तामणिविभूषितं सशरं चापम् अस्य महद् धनुः चरणाभ्यां बभञ्ज ।

- **कुतः** महातेजाः अस्य मुक्तामणिविभूषितं सशरं चापम् अस्य महत् धनुः चरणाभ्यां बभञ्ज ?
  **ततः (तदनन्तरम्)** महातेजाः अस्य मुक्तामणिविभूषितं सशरं चापम् अस्य महत् धनुः चरणाभ्यां बभञ्ज ।

ततोऽस्य सशरं चापं मुक्तामणिविभूषितम्।
चरणाभ्यां महातेजा बभञ्जास्य महद्धनुः ॥८॥

# भावः

तदनन्तरं महातेजस्वी जटायुः, अस्य (रावणस्य) मुक्तामणिविभूषितं बाणं चापं विशालं धनुः च चरणाभ्यां भग्नं कृतवान्।

स भग्नधन्वा विरथो हताश्वो हतसारथिः ।
अङ्केनादाय वैदेहीं पपात भुवि रावणः ॥९॥

स भग्नधन्वा विरथो हताश्वो हतसारथिः ।
अङ्केनादाय वैदेहीं पपात भुवि रावणः ॥९॥

# पदच्छेदः

सः, भग्नधन्वा, विरथः, हताश्वः, हतसारथिः,
अङ्केन, आदाय, वैदेहीम्, पपात, भुवि, रावणः ।

स भग्नधन्वा विरथो हताश्वो हतसारथिः ।
अङ्केनादाय वैदेहीं पपात भुवि रावणः ॥९॥

# अन्वयः

भग्नधन्वा विरथः हताश्वः हतसारथिः, सः रावणः वैदेहीम् अङ्केन आदाय भुवि पपात ।

स भग्नधन्वा विरथो हताश्वो हतसारथिः ।
अङ्केनादाय वैदेहीं पपात भुवि रावणः ॥९॥

## पदपरिचयः पदार्थः च -

| | | | |
|---|---|---|---|
| भग्नधन्वा | [भग्नः धनुः यस्य सः] | | |
| भग्नधन्वा | ['भग्नधनु'उका.पुं.,प्र.वि.,एक. विशेषणम्] | = | भग्नधनुयुक्तः अर्थात् रावणः |
| विरथः | [विगतः रथः यस्य सः ('विरथ'अका.पुं.,प्र.वि.,एक.)विशेषणम्] | = | रथविहीनः |
| हताश्वः | [हताः अश्वाः यस्य सः ('हताश्व'अका.पुं.,प्र.वि.,एक.) विशे.] | = | मृत-अश्वः अर्थात् रावणः |
| हतसारथिः | [हतः सारथिः यस्य सः ('हतसारथि'इका.,पुं.,प्र.वि.,एक.)वि.] | = | मृतसारथिः |
| सः | ['तद्'दका.,सर्व.,पुं.,प्र.वि.,एक.] | = | अर्थात् रावणः |
| रावणः | ['रावण'अका.,पुं.,प्र.वि.,एक.] | = | रावणः इति लङ्कापतिः |
| वैदेहीम् | ['वैदेही'ईका.,स्त्री.,द्वि.वि.,एक.] | = | सीताम् |
| अङ्केन | ['अङ्क'अका.पुं.,तृ.वि.,एक.] | = | क्रोडेन |
| आदाय | ['आङ्+दा+ल्यप्'] | = | गृहीत्वा/स्वीकृत्य |
| भुवि | ['भू'उका.पुं.,स.वि.,एक.] | = | भूतले |
| पपात | ['पत्,आत्मने.'लिट्.,प्र.पु.,एक.] | = | अपतत् |

स भग्नधन्वा विरथो हताश्वो हतसारथिः ।
अङ्केनादाय वैदेहीं पपात भुवि रावणः ॥९॥

## भावावबोधनम् -

................पपात अर्थात् पतितवान् ।

- क: पपात ? — स: रावण: पपात ।
- स: रावण: कुत्र पपात ? — स: रावण: भुवि पपात ।
- कीदृश: स: रावण: भुवि पपात ?
  हतसारथि: स: रावण: भुवि पपात ।
- कीदृश: हतसारथि: स: रावण: भुवि पपात ?
  हताश्व: हतसारथि: स: रावण: भुवि पपात ।
- कीदृश: हताश्व: हतसारथि: च स: रावण: भुवि पपात ?
  विरथ: हताश्व: हतसारथि: च स: रावण: भुवि पपात ।



स भग्नधन्वा विरथो हताश्वो हतसारथिः ।
अङ्केनादाय वैदेहीं पपात भुवि रावणः ॥९॥

- कीदृशः विरथः हताश्वः हतसारथिः च सः रावणः भुवि पपात ?
  भग्नधन्वा विरथः हताश्वः हतसारथिः च सः रावणः भुवि पपात ।
- भग्नधन्वा विरथः हताश्वः हतसारथिः च सः रावणः किं कृत्वा भुवि पपात ?
  भग्नधन्वा विरथः हताश्वः हतसारथिः च सः रावणः आदाय भुवि पपात ।
- भग्नधन्वा विरथः हताश्वः हतसारथिः च सः रावणः काम् आदाय भुवि पपात ?
  भग्नधन्वा विरथः हताश्वः हतसारथिः च सः रावणः वैदेहीम् आदाय भुवि पपात ।
- भग्नधन्वा विरथः हताश्वः हतसारथिः च सः रावणः वैदेहीं केन आदाय भुवि पपात ?
  भग्नधन्वा विरथः हताश्वः हतसारथिः च सः रावणः वैदेहीम् अङ्केन आदाय भुवि पपात ।

स भग्नधन्वा विरथो हताश्वो हतसारथिः ।
अङ्केनादाय वैदेहीं पपात भुवि रावणः ।।९।।

# भावः

जटायुः यदा रावणस्य धनुः रथं सारथिं च नाशितवान् तदा रावणः वैदेहीं (सीताम्) वामपक्षस्य अङ्के स्वीकृत्य भूमौ पतितवान् ।

संपरिष्वज्य वैदेहीं वामेनाङ्केन रावणः ।
तलेनाभिजघानाशु जटायुं क्रोधमूर्च्छितः॥१०॥

संपरिष्वज्य वैदेहीं वामेनाङ्केन रावणः ।
तलेनाभिजघानाशु जटायुं क्रोधमूर्च्छितः॥१०॥

# पदच्छेदः

संपरिष्वज्य, वैदेहीम्, वामेन, अङ्केन, रावणः,
तलेन, अभिजघान, आशु, जटायुम्, क्रोधमूर्च्छितः ।

संपरिष्वज्य वैदेहीं वामेनाङ्केन रावणः ।
तलेनाभिजघानाशु जटायुं क्रोधमूर्च्छितः॥१०॥

# अन्वयः

क्रोधमूर्च्छितः रावणः वैदेहीं वामेन अङ्केन संपरिष्वज्य जटायुं तलेन आशु अभिजघान ।

संपरिष्वज्य वैदेहीं वामेनाङ्केन रावणः ।
तलेनाभिजघानाशु जटायुं क्रोधमूर्च्छितः॥१०॥

## पदपरिचयः पदार्थः च -

| | | | |
|---|---|---|---|
| क्रोधमूर्च्छितः | [‘क्रोधमूर्छित’अका.पुं.,प्र.वि.,एक. रावणस्य विशेषणम्] | = | अतीव क्रुद्धः |
| रावणः | [‘रावण’अका.पुं.,प्र.वि.,एक.] | = | रावणः/लङ्काधिपतिः |
| वैदेहीम् | [‘वैदेही’ईका.पुं.,द्वि.वि.,एक. सीतायाः विशेषणम्] | = | सीताम्/जानकीम् |
| वामेन | [‘वाम’अका.पुं.,तृ.वि.,एक. अङ्कस्य विशेषणम्] | = | वामपक्षेण |
| अङ्केन | [‘अङ्क’अका.पुं.,तृ.वि.,एक.] | = | क्रोडेन |
| संपरिष्वज्य | [‘सम्+परि+ष्वञ्ज,आत्मने.’ल्यप्] | = | कर्षणं कृत्वा |
| जटायुम् | [‘जटायु’उका.पुं.,द्वि.वि.,एक.] | = | जटायुनामकं पक्षिश्रेष्ठम् |
| तलेन | [‘तल’अका.पुं.,तृ.वि.,एक.] | = | हस्तेन / चपेटिकया |
| आशु | [अव्ययम्] | = | शीघ्रम् / तत्क्षणम् |
| अभिजघान | [‘अभि+हन्,परस्मै.,’लिट्.,प्र.पु.,एक.] | = | ताडितवान्/हतवान् |

संपरिष्वज्य वैदेहीं वामेनाङ्केन रावणः ।
तलेनाभिजघानाशु जटायुं क्रोधमूर्च्छितः॥१०॥

**भावावबोधनम् -**

.................अभिजघान अर्थात् ताडितवान् ।

- क: अभिजघान? — रावणः अभिजघान ।
- कीदृशः रावणः अभिजघान ? — क्रोधमूर्च्छितः (अतीव क्रुद्धः) रावणः अभिजघान ।
- क्रोधमूर्च्छितः रावणः कम् अभिजघान ?
  क्रोधमूर्च्छितः रावणः जटायुम् अभिजघान ।
- क्रोधमूर्च्छितः रावणः कथं जटायुम् अभिजघान ?
  क्रोधमूर्च्छितः रावणः आशु जटायुम् अभिजघान ।
- क्रोधमूर्च्छितः रावणः जटायुं केन आशु अभिजघान ?
  क्रोधमूर्च्छितः रावणः जटायुं तलेन आशु अभिजघान ।



संपरिष्वज्य वैदेहीं वामेनाङ्केन रावणः ।
तलेनाभिजघानाशु जटायुं क्रोधमूर्च्छितः॥१०॥

- क्रोधमूर्च्छितः रावणः **किं कृत्वा** जटायुं तलेन आशु अभिजघान ?
  क्रोधमूर्च्छितः रावणः **संपरिष्वज्य** जटायुं तलेन आशु अभिजघान ।

- क्रोधमूर्च्छितः रावणः **केन** संपरिष्वज्य जटायुं तलेन आशु अभिजघान ?
  क्रोधमूर्च्छितः रावणः **अङ्केन** संपरिष्वज्य जटायुं तलेन आशु अभिजघान ।

- क्रोधमूर्च्छितः रावणः **कीदृशेन** अङ्केन संपरिष्वज्य जटायुं तलेन आशु अभिजघान ?
  क्रोधमूर्च्छितः रावणः **वामेन** अङ्केन संपरिष्वज्य जटायुं तलेन आशु अभिजघान ।

- क्रोधमूर्च्छितः रावणः **कां** वामेन अङ्केन संपरिष्वज्य जटायुं तलेन आशु अभिजघान ?
  क्रोधमूर्च्छितः रावणः **वैदेहीं** वामेन अङ्केन संपरिष्वज्य जटायुं तलेन आशु अभिजघान ।

संपरिष्वज्य वैदेहीं वामेनाङ्केन रावणः ।
तलेनाभिजघानाशु जटायुं क्रोधमूर्च्छितः ॥१०॥

# भावः

भूमौ पतितः रावणः उत्थाय, अत्यन्तं क्रोधेन सीतां वामे अङ्के गृहीत्वा, जटायुं शीघ्रम् एव चपेटिकया प्रहारं कृतवान् ।

जटायुस्तमतिक्रम्य तुण्डेनास्य खगाधिपः।
वामबाहून्दश तदा व्यपाहरदरिन्दमः॥११॥

जटायुस्तमतिक्रम्य तुण्डेनास्य खगाधिपः।
वामबाहून्दश तदा व्यपाहरदरिन्दमः॥११॥

# पदच्छेदः

जटायुः, तम्, अतिक्रम्य, तुण्डेन, अस्य, खगाधिपः, वामबाहून्, दश, तदा, व्यपाहरत्, अरिन्दमः ।

जटायुस्तमतिक्रम्य तुण्डेनास्य खगाधिपः।
वामबाहून्दश तदा व्यपाहरदरिन्दमः॥११॥

# अन्वयः

तदा तम् अतिक्रम्य अरिन्दमः खगाधिपः जटायुः तुण्डेन अस्य दश वामबाहून् व्यपाहरत्।

जटायुस्तमतिक्रम्य तुण्डेनास्य खगाधिपः।
वामबाहून्दश तदा व्यपाहरदरिन्दमः॥११॥

## पदपरिचयः पदार्थः च -

| | | | |
|---|---|---|---|
| तदा | [अव्ययम्] | = | तस्मिन् काले |
| तम् | [‘तद्’दका.पुं.,द्वि.वि.,एक.] | = | अर्थात् रावणद्वारा कृतं प्रहारम् |
| अतिक्रम्य | [‘अति+क्रम,परस्मै.’ल्यप्] | = | अतिक्रमणं कृत्वा |
| अरिन्दमः | [‘अरिन्दम’अका.पुं.,प्र.वि.,एक. विशेषणम्] | = | शत्रुनाशकः |
| खगाधिपः | [‘खगाधिप’अका.पुं.,प्र.वि.,एक. विशेषणम्] | = | पक्षिराजः |
| जटायुः | [‘जटायु’उका.पुं.,प्र.वि.,एक.] | = | जटायुनामकं पक्षिराजम् |
| तुण्डेन | [‘तुण्ड’अका.पुं.,तृ.वि.,एक.] | = | चञ्च्वा / चञ्चुमाध्यमेन |
| अस्य | [‘इदम्’मका.सर्व.पुं.,ष.वि.,एक.] | = | अर्थात् रावणस्य |
| दश | [‘दशन्’नका.,बहु. त्रिषु लिङ्गेषु समानरूपम्] | = | दश |
| वामबाहून् | [‘वामबाहु’उका.पुं.,द्वि.वि.,बहु.] | = | वामभुजाः |
| व्यपाहरत् | [‘वि+अप+हृ,परस्मै.’लङ्.,प्र.पु.,एक.] | = | उत्पाटयत् |

जटायुस्तमतिक्रम्य तुण्डेनास्य खगाधिपः।
वामबाहून्दश तदा व्यपाहरदरिन्दमः।।११।।

**भावावबोधनम् -**

................. व्यपाहरत् अर्थात् उत्पाटनं कृतवान् ।

- कः व्यपाहरत् ? — जटायुः व्यपाहरत् ।
- जटायुः कान् व्यपाहरत् ? — जटायुः वामबाहून् व्यपाहरत् ।
- जटायुः कस्य वामबाहून् व्यपाहरत् ?
  जटायुः अस्य (रावणस्य) वामबाहून् व्यपाहरत् ।
- जटायुः अस्य कति वामबाहून् व्यपाहरत् ?
  जटायुः अस्य (रावणस्य) दश वामबाहून् व्यपाहरत् ।
- जटायुः केन अस्य (रावणस्य) दश वामबाहून् व्यपाहरत् ?
  जटायुः तुण्डेन अस्य (रावणस्य) दश वामबाहून् व्यपाहरत् ।



जटायुस्तमतिक्रम्य तुण्डेनास्य खगाधिपः।
वामबाहून्दश तदा व्यपाहरदरिन्दमः॥११॥

- कीदृशः जटायुः तुण्डेन अस्य दश वामबाहून् व्यपाहरत् ?

  अरिन्दमः खगाधिपः जटायुः तुण्डेन अस्य दश वामबाहून् व्यपाहरत् ।
- किं कृत्वा अरिन्दमः खगाधिपः जटायुः तुण्डेन अस्य दश वामबाहून् व्यपाहरत् ?

  अतिक्रम्य अरिन्दमः खगाधिपः जटायुः तुण्डेन अस्य दश वामबाहून् व्यपाहरत् ।
- कम् अतिक्रम्य अरिन्दमः खगाधिपः जटायुः तुण्डेन अस्य दश वामबाहून् व्यपाहरत् ?

  तम् (रावणद्वारा कृतं प्रहारम्) अतिक्रम्य अरिन्दमः खगाधिपः जटायुः तुण्डेन अस्य दश वामबाहून् व्यपाहरत् ।
- कदा तम् अतिक्रम्य अरिन्दमः खगाधिपः जटायुः तुण्डेन अस्य दश वामबाहून् व्यपाहरत् ?

  तदा (यदा रावणः क्रोधेन प्रहारं कृतवान्) तम् अतिक्रम्य अरिन्दमः खगाधिपः जटायुः तुण्डेन अस्य दश वामबाहून् व्यपाहरत् ।

जटायुस्तमतिक्रम्य तुण्डेनास्य खगाधिपः।
वामबाहून्दश तदा व्यपाहरदरिन्दमः॥११॥

# भावः

रावणः यदा प्रहारं कृतवान् तदा जटायुः
रावणस्य प्रहारात् स्वस्य रक्षणं कृत्वा,
रावणस्य वामभागस्य दशभुजाः उत्पाटितवान्।

प्र.१ एकपदेन उत्तरं लिखत -

| | | |
|---|---|---|
| क) | मानवः कुत्र सुरक्षितः तिष्ठति ? | पर्यावरणकुक्षौ |
| ख) | सुरक्षितं पर्यावरणं कुत्र उपलभ्यते स्म ? | वने / अरण्ये |
| ग) | आर्षवचनं किमस्ति ? | धर्मो रक्षति रक्षितः |
| घ) | पर्यावरणमपि कस्य अङ्गमिति ऋषयः प्रतिपादितवन्तः ? | धर्मस्य |
| ङ) | लोकरक्षा कया सम्भवति ? | प्रकृतिरक्षया |
| च) | अजातस्शिशुः कुत्र सुरक्षितः तिष्ठति ? | मातृगर्भे |
| छ) | प्रकृतिः केषां संरक्षणाय यतते ? | समेषां प्राणिनां |

प्र.२ अधोलिखितप्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत-

क) प्रकृतेः प्रमुखतत्त्वानि कानि सन्ति ?
पृथिवी जलं तेजः वायुः आकाशः च प्रकृतेः प्रमुखानि तत्त्वानि सन्ति।

ख) स्वार्थान्धः मानवः किं करोति ?
स्वार्थान्धः मानवः पर्यावरणम् नाशयति।

ग) पर्यावरणे विकृते जाते किं भवति?
पर्यावरणे विकृते जाते विविधाः रोगाः भीषणसमस्याः च सम्भवन्ति।

घ) अस्माभिः पर्यावरणस्य रक्षा कथं करणीया ?
अस्माभिः प्रकृतिरक्षया पर्यावरण्स्य रक्षा करणीया।

ङ) लोकरक्षा कथं संभवति?
पर्यावरणरक्षया लोकरक्षा सम्भवति।

च) परिष्कृतं पर्यावरणम् अस्मभ्यं किं किं ददाति ?
परिष्कृतं पर्यावरणं अस्मभ्यं सांसारिकं जीवनसुखं, सद्विचारं, सत्यसङ्कल्पं माङ्गलिकह्सामग्रीञ्च प्रददाति।

प्र.3 स्थूलपदानि आधृत्य प्रश्ननिर्माणं कुरुत-

| | | |
|---|---|---|
| क) | **वनवृक्षाः** निर्विवेकं छिद्यन्ते। | के |
| ख) | **वृक्षकर्तनात्** शुद्धवायुः न प्राप्यते। | कस्मात् |
| ग) | प्रकृतिः **जीवनसुखं** प्रददाति। | किम् |
| घ) | अजातशिशुः **मातृगर्भे** सुरक्षितः तिष्ठति। | कुत्र |
| ङ) | पर्यावरणरक्षणं **धर्मस्य** अङ्गम् अस्ति। | कस्य |

प्र.4 उदाहरणमनुसृत्य पदरचनां कुरुत -

| | | |
|---|---|---|
| यथा | जले चरन्ति इति | जलचराः |
| | स्थले चरन्ति इति | स्थलचराः |
| | निशायां चरन्ति इति | निशाचराः |
| | व्योम्नि चरन्ति इति | व्योमचराः |
| | गिरौ चरन्ति इति | गिरिचराः |

| | | |
|---|---|---|
| | भूमौ चरन्तिइ ति | भूमिचराः |
| यथा | न पेयम् इति | अपेयम् |
| | न वृष्टि इति | अवृष्टि |
| | न सुखम् इति | असुखम् |
| | न भावः इति | अभावः |
| | न पूर्णः इति | अपूर्णः |

प्र.5 उदाहरणमनुसृत्य पदनिर्माणं कुरुत -

| | | |
|---|---|---|
| यथा | वि+कृ+क्तिन् | विकृति |
| क) | प्र+गम्+क्तिन् | प्रगतिः |
| ख) | दृश् +क्तिन् | दृष्टिः |
| ग) | गम्+क्तिन् | गतिः |
| घ) | मन् +क्तिन् | मतिः |
| ङ) | शम् +क्तिन् | शान्तिः |
| च) | भी +क्तिन् | भीतिः |
| छ) | जन् +क्तिन् | जातिः |
| ज) | भज् +क्तिन् | भक्तिः |
| झ) | नी +क्तिन् | नीतिः |

प्र.6 निर्देशानुसारं परिवर्तयत_

| | | |
|---|---|---|
| क) | सन्तप्तस्य मानवस्य मङ्गलं कुतः ? (बहुवचने) | सन्तप्तानां मानवानां मङ्गलं कुतः ? |
| ख) | मानवाः पर्यावरणकुक्षौ सुरक्षिताः भवन्ति। (एकवचने) | मानवः पर्यावरणकुक्षौ सुरक्षितः भवति। |
| ग) | वनवृक्षाः निर्विवेकं छिद्यन्ते। (एकवचने) | वनवृक्षः निर्विवेकं छिद्यते। |
| घ) | गिरिनिर्झराः निर्मलं जलं प्रयच्छन्ति। (द्विवचने) | गिरिनिर्झरौ निर्मलं जलं प्रयच्छतः। |
| ङ) | सरित् निर्मलं जलं प्रयच्छति। (बहुवचने) | सरितः निर्मलं जलं प्रयच्छन्ति। |

अ) पर्यावरणरक्षणाय भवन्तः किं करिष्यन्ति इति विषये पञ्चवाक्यानि लिखत।

क) अहं वृक्षारोपणं तस्य रक्षणं च करिष्यामि।

ख) अहं जलस्य यथायोग्यम् उपयोगं करिष्यामि।

ग) अहं नदीषु अवकरं न क्षेप्स्यामि।

घ) अहं तैलवाहनानां स्थाने द्विचक्रिकायाः उपयोगं करिष्यामि।

ङ) अहं प्लास्टिकनिर्मितानां वस्तूनाम् उपयोगं न करिष्यामि।

प्र.7 उदाहरणमनुसृत्य उपसर्गान् पृथक्कृत्वा लिखत_

| | |
|---|---|
| प्रभवति | प्र |
| उपलभ्यते | उप |
| निवसन्ति | नि |
| समुपहरन्ति | सम् + उप |

| | |
|---|---|
| वितरन्ति | वि |
| प्रयच्छति | प्र |
| उपगता | उप |
| प्रतिभाति | प्रति |

अ) समस्तपदानां विग्रहं लिखत।

| | |
|---|---|
| तेजोवायुः | तेजः वायुः च |
| गिरिनिर्झराः | गिरयः च निर्झराः च |
| पत्रपुष्पे | पत्रं च पुष्पं च |
| लतावृक्षौ | लता च वृक्षः च |
| पशुपक्षी | पशु च पक्षी च |
| कीटपतङ्गौ | कीटः च पतङ्गः च |

**प्र.१ एकपदेन उत्तरत।**

क) आयतलोचना का अस्ति ? सीता

ख) सा कं ददर्श ? गृधम्

ग) खगोत्तमः कीदृशीं गिरं वाजहार ? शुभाम्

घ) जटायुः काभ्यां रावणस्य गात्रे व्रणं चकार ? चरणाभ्याम्

ङ) अरिन्दमः खगाधिपः कति बाहून् व्यपाहरत् ? दश

**प्र.२ अधोलिखितप्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत-**

क) "जटायो ! पश्य" इति का वदति ?

- "जटायो ! पश्य" इति सीता वदति।

ख) जटायुः रावणं किं कथयति ?

जटायुः रावणं कथयति – "हे रावण ! नीचां मतिं परदारभिमर्शनात् निवर्तय, धीरः तत् न समाचरेत् यत् अस्य परः विगर्हयेत्। अहं वृद्धः, त्वं सरथः कवची, युवा, अपि च मे वैदेहीम् आदाय कुशली न गमिष्यति" इति।

ग) क्रोधवशात् रावणः किं कर्तुम् उद्यतः अभवत् ?

क्रोधवशात् रावणः वैदेहीं वामेन अङ्केन संपरिष्वज्य तलेन आशु जटायुम् अभिधतुम् उद्यतः अभवत्।

घ) पतगेश्वरः रावणस्य कीदृशं चापं सशरं बभञ्ज ?

- पतगेश्वरः रावणस्य मुक्तामणिविभूषितं चापं सशरं बभञ्ज।

ङ) जटायुः केन वामबाहुं दंशति ?

जटायुः तुण्डेन वामबाहुं दंशति।

**प्र.३ णिनि-प्रत्ययः**

क) गुण + णिनि गुणिन् (गुणी)

ख) दान + णिनि दानिन् (दानी)

ग) कवच + णिनि कवचिन् (कवची)

| | | |
|---|---|---|
| घ) | शर + णिनि | शरिन् (शरी) |
| ङ) | कुशल + णिनि | कुशलिन् (कुशली) |
| च) | धन + णिनि | धनिन् (धनी) |
| छ) | दण्ड + णिनि | दण्डिन् (दण्डी) |

**प्र.३ अ** रावणस्य जटायोः च विशेषणानि

| रावणः | जटायुः |
|---|---|
| युवा | वृद्धः |
| सशरः | पतगसत्तमः |
| हताश्वः | महागृध्रः |
| महाबलः | खगाधिपः |
| भग्नधन्वा | पतगेश्वरः |
| क्रोधमूर्च्छितः | |
| सरथः | |
| कवची | |
| शरी | |

प्रः ४ पर्यापदानि मेलयत

| | क | ख | उत्तरम् |
|---|---|---|---|
| क) | कवची | अपतत् | कवचधारी |
| ख) | आशु | पक्षिश्रेष्ठः | शीघ्रम् |
| ग) | विरथः | पृथिव्याम् | रथविहीनः |
| घ) | पपात | कवचधारी | अपतत् |
| ङ) | भुवि | शीघ्रम् | पृथिव्याम् |
| च) | पतगसत्तमः | रथविहीनः | पक्षिश्रेष्ठः |

## कक्षा – ९ पाठः१० जटायोः शौर्यम् अभ्यासः

प्रः ४ विलोमपदानि मेलयत

| | क | ख | उत्तरम् |
|---|---|---|---|
| क) | विलपन्ती | हसन्ती | |
| ख) | आर्य | अनार्य | |
| ग) | राक्षसेन्द्रेण | देवेन्द्रेण | |
| घ) | पापकर्मणा | पुण्यकर्मणा | |
| ङ) | क्षिप्रम् | मन्दम् | |
| च) | विगर्हयेत् | प्रशंसेत् | |
| छ) | वृद्धः | युवा | |
| ज) | वामेन | दक्षिणेन | |
| झ) | अतिक्रम्य | अनतिक्रम्य | |

कक्षा – ९ पाठः९ सिकतासेतुः अभ्यासः

**प्र.१ एकपदेन उत्तरत।**

| | | |
|---|---|---|
| क) | कः बाल्ये विद्यां न अधीतवान् ? | तपोदत्तः |
| ख) | तपोदत्तः कया विद्याम् अवाप्तुं प्रवृत्तः अस्ति ? | तपश्चर्यया |
| ग) | मकरालये कः शिलाभि: सेतुं बबन्ध ? | रामः |
| घ) | मार्गभ्रान्तः सन्ध्यां कुत्र उपैति ? | गृहम् |
| ङ) | पुरुषः सिकताभिः किं करोति ? | सेतुनिर्माणं / सेतुनिर्माणप्रयासं |

**प्र.२ अधोलिखितप्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत-**

क) अनधीतः तपोदत्तः कैः गर्हितोऽभवत् ?

- अनधीतः तपोदत्तः सर्वैः कुटुम्बिभिः मित्रैः ज्ञातिजनैः च गर्हितः अभवत्।

ख) तपोदत्तः केन प्रकारेण विद्यामवाप्तुं प्रवृत्तोऽभवत् ?

तपोदत्तः तपश्चर्यया विद्यामवाप्तुं प्रवृत्तोऽभवत्

ग) तपोदत्तः पुरुषस्य कां चेष्टां दृष्ट्वा अहसत् ?

तपोदत्तः पुरुषस्य सिकताभिः सेतुनिर्माणस्य प्रयासं दृष्ट्वा अहसत् ।

घ) तपोमात्रेण विद्यां प्राप्तुं तस्य प्रयासः कीदृशः कथितः ?

- तपोमात्रेण विद्यां प्राप्तुं तस्य प्रयासः सिकताभिरेव सेतुनिर्माणप्रयासमिव कथितः।

ङ) अन्ते तपोदत्तः विद्याग्रहणाय कुत्र गतः ?

अन्ते तपोदत्तः विद्याग्रहणाय गुरुकुलं गतः।

**प्र.५ स्थूलपदानि अधिकृत्य प्रश्नवाक्यनिर्माणं कुरुत-**

| | | |
|---|---|---|
| क) | तपोदत्तः **<u>तपश्चर्यया</u>** विद्यामवाप्तुं प्रवृत्तोऽस्ति। | कया |
| ख) | **<u>तपोदत्तः</u>** कुटुम्बिभिः मित्रैः गर्हितः अभवत्। | कः |
| **ग)** | पुरुषः **<u>नद्यां</u>** सिकताभिः सेतुं निर्मातुं प्रयतते। | कुत्र |
| घ) | तपोदत्तः **<u>अक्षरज्ञानं</u>** विनैव वैदुष्यवाप्तुम् अभिलषति। | किम् |

ङ) तपोदत्तः **<u>विद्याध्ययनाय</u>** गुरुकुलम् अगच्छत्। किमर्थम्

च) **<u>गुरुगृहं</u>** गत्वैव विद्याभ्यासः करणीयः। कुत्र

**प्र.६ समास**

| | | |
|---|---|---|
| उदा० | संकल्पस्य सातत्येन | संकल्पसातत्येन |
| क) | अक्षराणां ज्ञानम् | अक्षरज्ञानम् |
| ख) | सिकतायाः सेतुः | सिकतासेतुः |
| ग) | पितुः चरणैः | पितृचरणैः |
| घ) | गुरोः गृहम् | गुरुगृहम् |
| ङ) | विद्यायाः अभ्यासः | विद्याभ्यासः |

समासविग्रहः

| | | |
|---|---|---|
| उदा० | नयनयुगलम् | नयनयोः युगलम् |
| क) | जलप्रवाहे | जलस्य प्रवाहे |
| ख) | तपश्चर्यया | तपसः चर्यया |
| ग) | जलोच्छलध्वनिः | जलस्य उच्छलध्वनिः |
| घ) | सेतुनिर्माणप्रयासः | सेतोः निर्माणस्य प्रयासः |

कक्षा - ९ पाठः ६ भ्रान्तो बालः अभ्यासः

**प्र.१ एकपदेन उत्तरत।**

| | | |
|---|---|---|
| क) | कः तन्द्रालुः भवति ? | बालकः |
| ख) | बालकः कुत्र व्रजन्तं मधुकरम् अपश्यत् ? | पुष्पोद्याने |
| ग) | के मधुसङ्ग्रहव्यग्राः अभवन् ? | मधुकराः / भ्रमराः |
| घ) | चटकः कया वृणशलाकादिकम् आददाति ? | चञ्च्वा |
| ङ) | चटकः कस्य शाखायां नीडं रचयति ? | वटद्रुमस्य |
| च) | बालकः कीदृशं श्वानं पश्यति ? | पलायमानम् |
| छ) | श्वा कीदृशे दिवसे पर्यटति ? | निदाधदिवसे |

**प्र.२ अधोलिखितप्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत-**

क) बालः कदा कीडितुम् अगच्छत् ?

- बालः पाठशालागमनवेलायां क्रीडितुम् अगच्छत्

ख) बालस्य मित्राणि किमर्थं त्वरमाणा अभवन् ?

बालकस्य मित्राणि पूर्वदिनपाठान् स्मृत्वा विद्यालयगमनाय त्वरमाणाः अभवन्।

ग) मधुकरः बालकस्य आह्वानं केन कारणेन तिरस्कृतवान् ?

मधुकरः मधुसङ्ग्रहव्यग्रः आसीत् अतः सः बालकस्य आह्वानं तिरस्कृतवान्।

घ) बालकः कीदृशं चटकम् अपश्यत् ?

- बालकः चञ्च्वा तृणशलाकादिकम् आददानम् चटकम् अपश्यत्।

ङ) बालकः चटकाय क्रीडनार्थं कीदृशं लोभं दत्तवान् ?

बालकः चटकाय स्वादूनां भक्ष्यकवलानां लोभं दत्तवान्।

च) खिन्नः बालकः श्वानं किम् अकथयत् ?

- खिन्नः बालकः श्वानं अकथयत् – "रे मानुषाणं मित्र ! किं पर्यटसि निदाधदिवसे ? इदं प्रच्छायशीतलं तरुमूलम् आश्रयस्व। अहमपि कीडासहायं त्वामेवानुरूपंपश्यामीति। कुक्कुरः प्रत्यवदत् – तरुमूलम् आश्रयस्व" इति।

छ) भग्नमनोरथः बालः किम् अचिन्तयत् ?

भग्नमनोरथः बालः अचिन्तयत् –"कथमस्मिन् जगति प्रत्येकं स्व-स्वकार्ये निमग्नो भवति। न कोऽपि मामिव वृथा कालक्षेपं सहते। नम एतेभ्यः यैः मे तन्द्रालुतायां कुत्सा समापादिता। अथ स्वोचितम् अहमपि करोमि" इति।

**प्र.५ स्थूलपदानि अधिकृत्य प्रश्नवाक्यनिर्माणं कुरुत-**

| | | |
|---|---|---|
| क) | **<u>स्वादूनि</u>** भक्ष्यकवलानि ते दास्यामि। | कीदृशानि |
| ख) | चटकः **<u>स्वकर्मणि</u>** व्यग्रः आसीत्। | कस्मिन् |
| **ग)** | कुक्कुरः **<u>मानुषाणां</u>** मित्रम् अस्ति। | केषाम् |
| घ) | स **<u>महतीं</u>** वैदुषीं लब्धवान्। | कीदृशीम् |
| ङ) | **<u>रक्षानियोगकरणात्</u>** मया न भ्रष्टव्यम् इति। | कस्मात् |

**प्र.७ अ क स्तम्भे समस्तपदानि, ख स्तम्भे विग्रहवाक्यानि दत्तानि, तानि यथोचितं योजयत-**

| | क | ख | उत्तराणि |
|---|---|---|---|
| क) | दृष्टिपथम् | १) पुष्पाणाम् उद्यानम् | दृष्टेः पन्थाः |
| ख) | पुस्तकदासाः | २) विद्यायाः व्यसनी | पुस्तकानां दासाः |
| ग) | विद्याव्यसनी | ३) दृष्टेः पन्थाः | विद्यायाः व्यसनी |
| घ) | पुष्पोद्यानम् | ४) पुस्तकानां दासाः | पुष्पाणाम् उद्यानम् |

**प्र.७ ब विशेषणं विशेष्यं च पृथक् कुरुत।**

| | | विशेषणम् | विशेष्यम् |
|---|---|---|---|
| क) | खिन्नः बालः | खिन्नः | बालः |
| ख) | पलायमानं श्वानम् | पलायमानं | श्वानम् |
| ग) | प्रीतः बालकः | प्रीतः | बालकः |
| घ) | स्वादूनि भक्ष्यकवलानि | स्वादूनि | भक्ष्यकवलानि |
| ङ) | त्वरमाणाः वयस्याः | त्वरमाणाः | वयस्याः |

# शब्दरूपाणि - अभ्यासः

| क्रमः | वाक्यम् | शब्द |
|---|---|---|
| १ | __________ गङ्गा श्रेष्ठा | नद्याः / नदीषु / नद्यः |
| २ | __________ पतिः विष्णुः अस्ति। | रमा |
| ३ | भवान् __________ विश्वसिति। | धर्म |
| ४ | प्रजापालनम् एव __________ धर्मः। | राजन् |
| ५ | __________ चत्वारः सन्ति। | वेद |
| ६ | वृक्षाणां रक्षा __________ परमं कर्तव्यम्। | अस्मद् ब.व. |
| ७ | या बालिका दिल्लीतः आगता __________ नाम सुनीता अस्ति। | तत्-स्त्री |
| ८ | चन्द्रः __________ प्रकाशं लभते। | सूर्य |
| ९ | सः __________ पश्यति। | गुरु |
| १० | ते सर्वान् __________ नमन्ति। | देव |
| ११ | द्वौ __________ आगच्छताम्। | कवि |
| १२ | अहं __________ आज्ञाकारी शिष्यः अस्मि। | भवत् |
| १३ | पिता __________ सह गच्छति। | पुत्र |
| १४ | __________ पुत्रौ लवः कुशः च। | सीता |
| १५ | इदं पुस्तकं __________ अस्ति ? | किम् – पुं |
| १६ | __________ अनेके खगाः निवसन्ति। | वृक्ष |
| १७ | __________ सुगन्धः मनोहरः। | पुष्प – ब.व. |
| १८ | छात्रा __________ गच्छति। | पाठशाला |
| १९ | मञ्चे अनेके __________ उपविष्टाः सन्ति। | विद्वस् |
| २० | अस्मिन् __________ सर्वे जीवाः रक्षणीयाः। | जगत् |
| २१ | अहं __________ उपहारं दत्तवान्। | मातृ |
| २२ | सर्वे भवन्तु __________। | सुखिन् |
| २३ | अहं __________ अनुसरणं करोमि। | पितृ |
| २४ | __________ नाम कालिदासः। | कवि |
| २५ | __________ विद्यालयस्य नाम किम् ? | युष्मद् |

नदीषु, रमायाः, धर्मे, राज्ञः, वेदाः, अस्माकम्, तस्याः, सूर्यात्, गुरुं, देवान्, कवी, भवतः, पुत्रेण, सीतायाः, कस्य, वृक्षे, पुष्पाणां, पाठशालां, विद्वांसः, जगति, मात्रे, सुखिनः, पितुः, कवेः, तव

www.bhavinpathak.webs.com

# धातुरूपाणि - अभ्यासः

## प्रत्ययाः (परस्मैपदिनः / आत्मनेपदिनः)

| | परस्मैपदिनः | | | पुरुषः | आत्मनेपदिनः | | |
|---|---|---|---|---|---|---|---|
| | एकवचनम् | द्विवचनम् | बहुवचनम् | | एकवचनम् | द्विवचनम् | बहुवचनम् |
| लट् लकारः वर्तमानकालः | ति | तः | अन्ति | प्र.पु. | ते | इते | अन्ते |
| | सि | थः | थ | म.पु. | से | इथे | ध्वे |
| | मि/आमि | वः/आवः | मः/आमः | उ.पु. | इ | वहे | महे |
| लृट्लकारः भविष्यत्कालः | स्यति | स्यतः | स्यन्ति | प्र.पु. | स्यते | स्येते | स्यन्ते |
